लोहितार्णः सुधामा च भानिस्तस्यापि सप्तमः।
गिरयस्यापि सप्तैव वर्षसीमाकरा द्विज!।
शुक्लोऽथ वर्द्धमानश्च भोजन उपबर्हणः॥
नन्दमो नन्दनश्चैव सर्व्वतोभद्र इत्यपि।
सप्त तत्र महानद्यः पावना ब्राह्मणर्षभ!॥
अभया चाम्रतौघा च ह्यप्तिरूपवती तथा।
तीर्थवत्यार्य्यका शुक्ला पवित्रवत्यपि स्मृता॥
विप्रादयस्तथा वर्णाः ख्याता नामान्तरेण तु।
पुरुषः प्रथमो वर्णो द्वितीयो ऋषभः स्मृतः॥
तृतीयो द्रविणो नाम देवसंज्ञश्चतुर्थकः।
मूर्त्तिं जलमयीं विष्णोर्ध्यायन्ति च यजन्ति च॥*॥
एवं परस्तात् क्षीरोदात् शाकद्वीपो द्विजर्षभ!।
आयामेन स विज्ञेयो द्वात्रिंशल्लक्षयोजनः॥
दधिमण्डोदकेनैव समानेन स सिन्धुना।
परीतो भाति तत्रास्ति शाको नाम महीरुहः॥
द्वीपख्यातिकरः श्रीमान् वासयन् द्वीपमेव तम्।
वर्षाणि तत्र सप्तैव पुरोजवमनोजवौ॥
धूम्रानीको वेपमानो विश्वाधारश्च मारिष!।
बहुरूपश्चित्ररेफो गिरयोऽपि च सप्त वै॥
ईशान उरुशृङ्गश्च बलभद्रो महानसः।
शतकेशवनामा च सहस्रस्रोत एव च॥
देवपालोऽपि सप्तैते वर्षसीमप्रवर्त्तकाः।
नद्यः सप्तैव विख्याता आयुर्दाप्यनघा द्विज!॥
सहस्रश्रुतिः पञ्चनदी निर्वृतिरपराजिता।
विख्यातोभयस्पृष्टिश्च महापुण्या महाफलाः॥
विप्रादयस्तथा वर्णा ख्याता नामान्तरेण तु।
आद्यो ऋतव्रतो नाम ततः सत्यव्रतः स्मृतः॥
दानव्रतानुव्रतौ च तृतीयश्च चतुर्थकः।
भगवन्तं वायुरूपं भजन्ते च यजन्ति च॥*॥
तथैव दधिमण्डोदात् परस्तात् पुष्करो महान्।
द्विगुणेन प्रमाणेन द्वीपः स्वादूदकेन तु॥
परिवीतः समानेन सिन्धुना ब्राह्मणर्षभ!।
यत्र पुष्करमत्युच्चं ज्वलज्ज्वलनसन्निभम्॥
द्वीपख्यातिकरं पत्रसहस्रायुतशोभितम्।
यदाहुरासनं विश्वस्रजस्तस्य प्रजापतेः॥
द्वीपमध्येऽवधिगिरिरेक एव महामते!।
स मानसोत्तरो नाम प्राकार इव वेष्टकः॥
तस्य पूर्व्वापरौ पार्श्वौ देवर्षे! तत्र मारिष!।
सिन्धोर्वेष्टनमत्रैकं गिरेर्वेष्टनकं परम्॥
रमणकं धातकञ्च द्वे वर्षे नामतः स्मृते।
मानं तस्य गिरेर्विप्रायुतयोजनमुच्छ्रितम्॥
तावदेव तथायामस्तस्योपरि पुराणि च।
चत्वारि लोकपालानामिन्द्रादीनां द्विजर्षभ!॥
यः परिक्रममाणस्य मेरुं विप्र! विवस्वतः।
मूर्द्ध्नि विभर्त्ति शैलेन्द्रश्चक्रं सम्वत्सरात्मकम्॥
अध्यासते च द्वौ पार्श्वौ प्रजास्तस्य महाबलाः।
तत्र संज्ञान्तरं नास्ति वर्णानां ब्राह्मणर्षभ!॥
स्वादूदकस्य परतो लोकालोकाचलो महान्।
लोकस्य चाप्यलोकस्य मध्ये गिरिवरः स्थितः॥
प्राकार इव संवेष्ट्य लोकान् सर्व्वान्महामते!।
लोकालोकाचलो नाम तेनासौ परिकीर्त्तितः॥
मानसोत्तरमेर्व्वोस्तु अन्तरं यावती मही।
तावती काञ्चनी भूमिर्लोकालोकात् परे द्विज!॥
यत्र प्रणिहितं वस्तु कथञ्चिन्नोपलभ्यते।
सौवर्णी कान्तिरुद्दीप्ता सर्व्ववर्णप्रमाथिनी॥
अतः सर्व्वाणि सत्त्वानि तां भूमिं वर्जयन्ति हि।
लोकालोको गिरिर्यस्तु लोकान्ते वर्त्तते महान्॥
आवृणोति स तेजांसि सूर्य्यादीनामपि द्विज!।
तमतिक्रम्य ज्योतींषि चमन्ते न प्रवर्त्तितुम्॥
तावदुन्नाहवान् ब्रह्मन्नायामेन च तादृशः।
आयामविस्तरे पृथ्वी पञ्चाशत्कोटियोजना॥
तस्याश्चतुर्थभागोऽयं लोकालोकाचलो गिरिः।
तस्योपरिष्टाच्चत्वारो गजेन्द्राः सुमहाबलाः॥
नियुक्ता ब्रह्मणा भूमिं करैराकृष्य संस्थिताः।
भगवानपि तत्रैव विष्वक्सेनादिभिर्वृतः॥
पार्षदप्रवरैर्ब्रह्मन्! भुजैर्बहुभिरुच्छ्रितैः।
धारयन् जगतीमास्ते आकल्पमपि मारिष!॥
योऽन्तर्विस्तार एतस्या भूम्यास्ते परिवर्णितः।
तावती भूरलोकाख्या साऽन्धसन्तमसावृता॥
ततो योगेश्वरगतिर्योगिनां प्राप्यमुत्तमम्।
स्थानं भगवतः साक्षात् श्वेतद्वीप इतीर्य्यते॥
इति ते कथितं ब्रह्मन्! भूगोलस्योपवर्ण-
नम्॥

व्यास उवाच।

य इदं शृणुयात् सूत! भूगोलस्यानुवर्णनम्।
प्रदक्षिणीकृता तेन सशैलवनकानना।
ससागरा च सद्वीपा सवर्षा च वसुन्धरा॥
इति श्रीपद्मपुराणे भूमिखण्डे भूगोलवर्णनं नाम
१३१ अध्यायः॥*॥ ज्योतिषशास्त्रोक्तभूगोलम्॥
यथा,—
"सिद्धिं साध्यमुपैति यत्स्मरणतः क्षिप्रं
प्रसादात्तथा
यस्याश्चित्रपदाश्च संसृतिरसं लालित्यलीला-
वती।
नृत्यन्ती मुखरङ्गगेव कृतिनां स्याद्भारती
भारती
तं तांश्च प्रणिपत्य गोलममलं बालावबोधं
ब्रुवे॥"
गोलग्रन्थकथने कारणमाह।
'मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं
विना
प्रौढिं प्रौढसभासु नैति गणको निःसंशयो न
स्वयम्।
गोले सा विमला करामलकवत् प्रत्यक्षतो
दृश्यते
तस्मादस्म्युपपत्तिबोधविधये गोलप्रबन्धोद्यतः॥'
अथ गोलप्रशंसया गोलानभिज्ञगणकोपहास-
माह।
'भोज्यं यथा सर्व्वरसं विनाज्यं
राज्यं यथा राजविवर्ज्जितञ्च।
सभा न भातीव सुवक्तृहीना
गोलानभिज्ञो गणकस्तथैव॥
वादी व्याकरणं विनैव विदुषां धृष्टः प्रविष्टः
सभां
जल्पन्नल्पमतिः स्मयात् पटुवटुभ्रूभङ्गवक्रो-
क्तिभिः।
ह्रीतः सन्नुपहासमेति गणको गोलानभिज्ञ-
स्तथा
ज्योतिर्व्वित् सदसि प्रगल्भगणकप्रश्नप्रपञ्चो-
क्तिभिः॥'
अथ गोलस्वरूपमाह।
'दृष्टान्त एवावनिभग्रहाणां
संस्थानमानप्रतिपादनार्थम्।
गोलः स्मृतः क्षेत्रविशेष एव
प्राज्ञैरतः स्याद्गणितेन गम्यः॥'
अथ गणितप्रशंसामाह।
'ज्योतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते
नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम्।
ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न
ज्ञायते
तस्मात् यो गणितं न वेत्ति स कथं गोलादिकं
ज्ञास्यति॥'
अथ ज्योतिषशास्त्रश्रवणाधिकारिलक्षणमाह।
'द्विविधगणितमुक्तं व्यक्तमव्यक्तसंज्ञं
तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः।
यदि भवति तदेदं ज्योतिषं भूरिभेदं
प्रपठितुमधिकारी सोऽन्यथा नाधिकारी॥'
व्याकरणवर्णनमाह।
'यो वेद वेदवदनं सदनं हि सम्यग्-
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी॥'
अथ गोलग्रन्थस्य प्रवृत्त्यर्थमन्योक्तप्रकारेणाह।
'गोलं श्रोतुं तव यदि मतिर्भास्करीयं शृणु त्वं
नो संक्षिप्तो न च बहु वृथा विस्तरः शास्त्र-
तत्त्वम्।
लीलागम्यः सुललितपदः प्रश्नरम्यः स यस्मा-
द्विद्वन्! विद्वत्सदसि पठतां पण्डितोक्तिं व्यनक्ति॥'
अथ भूसंस्थानं प्रश्नश्लोकद्वयेन आह।
'भ्रमद्भचक्रचक्रान्तर्गगने गगनेचरैः।
वृता धृता धरा केन येन नेयमियादधः॥
किमाकारा कियन्माना नानाशास्त्रविचार-
णात्।
कीदृग्द्वीपकुलाद्रीन्द्रसमुद्रैर्मुद्रितोच्यताम्॥'
अथ ग्रहस्फुटीकरणोपपत्तिप्रश्नं श्लोकद्वयेनाह।
'संसिद्धो द्युगणाद्युगादिभगणैः खेटोऽनु-
पातेन यः
स्पष्टत्वास्फुटता कथं कथमभूत् स्पष्टीकृति-
र्नैकधा।
किं देशान्तरमुक्रमान्तरमहो बाह्वन्तरं किञ्चरं
किञ्चोच्चं बहु चञ्चलञ्च तदिदं कस्मात्! प्रातः
स्मृतः॥
किं केन्द्रं किमु केन्द्रजं किमु चलं किन्नाचलं
तत्फलं
कस्मात्तत्सहितः कृतश्च रहितः खेटस्फुटो
जायते।